भैरवमिश्रकृतव्याख्यासंवलिता सिद्धान्तकौमुदी ।

लिङ्गानुशासनम् ।७१।

१ **लिङ्गम्** ।

२ **स्त्री** – अधिकारसूत्रे एते ।

३ **ऋकारान्ता मातृदुहितृस्वसृपोतृननान्दरः** – ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः।

स्वस्रादिपञ्चकस्यैव ङीब्निषेधेन कर्त्रीत्यादिर्ङीपा ईकारान्तत्वात् । तिसृचतस्रोस्तु

स्त्रियामादेशतया विधानेपि प्रकृत्योस्त्रिचतुरोऋदन्तत्वाभावात् ।

४ **अन्यू–प्रत्ययान्तो धातुः** – अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात् ।

अवनिः। चमूः। प्रत्ययग्रहणं किम्–देवयतेः क्विप् धूः। विशेष्यलिङ्गः ।

५ **अशनिभरण्यारणयः पुंसि च** – इयमयं वा अशनिः

६ **मिन्यन्तः** – मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। भूमिः । ग्लानिः।

७ **वन्हिवृष्ण्याग्नयः पुंसि** – पूर्वस्यापवादः।

८ **श्रोणियोन्यूर्मयः पुंसि च** – इयमयं वा श्रोणिः।

९ **क्तिन्नन्तः**– स्पष्टम्। कृतिरित्यादि ।

१० **ईकारान्तश्च** – ईप्रत्यायान्तः स्त्री स्यात्। लक्ष्मीः।

११ **ऊङाबन्तश्च** – कुरूः। विद्या।

१२ **य्वन्तमेकाक्षरम्** – श्रीः। भूः। एकाक्षरं किम्–पृथुश्रीः। विद्या ।

१३ **विंशात्यादिरानवतेः**। इयं विंशतिः । त्रिशत्। चत्त्वारिंशत् । पञ्चाशत्। षष्टिः।

सप्ततिः। अशीतिः नवतिः ।

१४ **दुन्दुभिरन्देषु**– इयं दुन्दुभिः। प्रदेषु किम्–प्रयं दुन्दुभिर्वाद्यविशेषो सुरो वेस्यर्थः।

१५ **नाभिरक्षित्रिये** – इयं नाभिः।

१६ **उभावप्यन्यत्र पुंसि** – दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः। नाभिः क्षत्रियः

कथं तर्हि समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिरिति भारविः।
उच्यते। धृढंभक्तिरित्यस्यदबिव कोमलैरिति सामान्ये नपुंसकं बोध्यम्। वस्तुतस्तु
लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्यत्पुंस्त्वमपीह साधु। अत एव नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामद इति मेदिनी। रभसोप्याह–मुख्यराट्क्षत्रिये नाभिः पुंसि द्वयोः चकमध्ये प्रधाने च स्त्रियां कस्तुरिकामद इति । एवंविधेनान्यत्रापि बोध्यम्।

१७ **तलन्तः**– अयं स्त्रियां स्यात्। श्क्लस्य भावः शुक्लता। ब्रह्मणस्य कर्म ब्राह्माणता। ग्रमस्य समूहो ग्रामता। देव एव देवता।

१८ **भूमीविधुत्सरिल्लतावनिताभिधानानि** – भूमिर्भूः। विधुत्सौदामनी। सरन्निम्नगाः।

लता वल्ली। वनीता योषित्।

१९ **यादो नपुंसकम्** – यादःशब्दः सरिद्वाचकोऽपि क्लीबं स्यात्।

२० **भाःस्रुक्स्रग्दिगुष्णिगुपानहः** – एते स्त्रियां स्युः। इयं भा इत्यादि।

२१ **स्थूणोर्णे नपुंसके च।** एते स्त्रियां क्लीबे च स्तः – स्थूणा। स्थूणम्। ऊर्णा।

ऊर्णम् । तत्र स्थूणा काष्ठमयी द्विकर्णिका। ऊर्णा तु मेषादिलोम ।

२२ **गृहशशाभ्यां क्लीबे** – नियमार्थमिदम्। गृहशशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः । गृहस्थूणम्। शशोर्णं शशलोमनि–इत्यमरः ।

२३ **प्रवृट्विप्रुट्रूट्विट्त्विषः** – एते स्त्रियां स्युः

२४ **दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः** – एते स्त्रियां स्युः। पक्षे ङीप्। दर्वी। दर्विरित्यादि ।

२५ **तिथिनाडिरुचिवीचिनालि–धूलिकिकिकेलिच्छ्विरात्र्यादयः**। एते प्राग्वत्। इयं

तिथिरित्यादि। अमर–स्त्वाहतिथयो द्वयोरिति तथा च भारविः। तस्य भुवि

बहुतिथास्तिथय इति। स्त्रीत्वे हि बहुतिथ्य इति स्यात्। श्रीहर्ष श्च। निखिलान्निशि

पौर्णिमातिथीनिति।

२६ **शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः** – एतेऽपि स्त्रियां स्युः। इयं शष्कुलिः।

२७ **प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषः संवित्क्षुत्पुन्मुत्समिधः** – इयं

प्रतिपदित्यादि । उषा उच्छन्ती उषाः प्रातरधिष्ठात्री देवता ।

२८ **आशीर्धूः पूर्गीर्द्वारः** – इयमाशीरित्यादि ।

२९ **अप्सुमनस्समासिकतावर्षाणां बहुत्वं च** – अबादीनां पञ्चानां स्त्रीत्वं स्याद्बहुत्वं च। आप इमाः स्त्रियः सुमनसः पुष्पं । सुमना मालती जातिः देववाची तु पुंस्येव ।

सुपर्वाणः सुमनसः । बहुत्वं प्रायिकम् । एका च सिकता तैलदाने असमर्थेति

अर्थवत्सूत्रे भाष्यप्रयोगात् । 'समांसमां विजायते १८१३' इत्यत्र समायां समायामिति

भाष्याच्च । विभाषा घ्राधेट् (१३७६) इति सुत्रे अघ्रासातां सुमनसाविति

वृत्तिव्याख्यायां हरदत्तोऽप्येवम् ।

३० **स्रुक्त्वक्ज्योग्वाग्यवागूनौस्फिजः** – इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः

स्फिक् ।

३१ **तृटिसीमासंबध्याः** – इयं तृटिः । सीमा । संबध्या ।

३२ **चुल्लिवेणिखार्यश्च** – स्पष्टम् ।

३३ **ताराधाराज्योत्स्नादयश्च**

३४ **शलाका स्त्रियां नित्यम्** – नित्यग्रहणमन्येषां क्वचिद्व्यभिचारं ज्ञापयति॥ इति

स्त्र्यधिकारः । पुँल्लिङ्गाधिकारः ।

३५ **पुमान्** – अधिकारोऽयम् ।

३६ **घञबन्तः –** पाकः । त्यागः । करः । गरः । भावार्थ एवेदम् ।
नपुंसकत्वविशिष्टे भावे
क्तल्युड्भ्यां, स्त्रीस्वविशिष्टे तु क्तिन्नादिभिर्बाधेन परिशेषात् । कर्मादौ तु घञाद्यन्तमपि विशेष्य–लिङ्गम् । तथा च भाष्यम् । संबन्धमनुवर्तिष्यत इति।
३७ **घाजन्तश्च –** विस्तरः गोचरः चयः जय इत्यादि ।
३८ **भयलिङ्गभगपदानि नपुंसके –** एतानि नपुंसके स्युः । भयम् ।
लिङ्गम् । भगम् । पदम् ।
३९ **नङन्तः –** नङ्प्रत्ययान्तः पुंसि स्यात् । यज्ञः । यत्नः ।
४० **याच्ञा स्त्रियाम् –** पुर्वस्यापवादः ।
४१ **क्यन्तो घुः –** किप्रत्ययान्तो घुः पुंसि स्यात् । आधिः । निधिः । उदधिः ।
क्यन्तः
किम्– दानम् । घुः किम्–जज्ञिर्बीजम् ।
४२ **इषुधिः स्त्री च–** इषुधिशब्दः स्त्रियां पुंसि च । पुर्वस्यापवादः ।
४३ **देवासुरात्म–**
स्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि
एतानि पुंसि स्युः । देवाः सुराः असुरा दैत्याः। आत्मा क्षेत्रज्ञः । स्वर्गो नाकः।
गिरिः
पर्वतः । समद्रोऽब्धिः । नखः कररुहः । केशः शिरोरुहः । दन्तो दशनः ।
स्तनः
कुचः । भुजो दोः । कण्ठो गलः। खड्गः करवालः । शरो मार्गणाः । पङ्कः
कर्दम
इत्यादि ।
४४ **त्रिविष्टपत्रिभुवने नपुंसके –** स्पष्टम् । तृतियं विष्टपं त्रिविष्टम् ।
स्वर्गभिधानतया
पुंस्त्वे प्राप्ते अयमारम्भः ।
४५ **द्यौः स्त्रियाम् –** द्योदिवोस्तन्त्रेणोपादानमिदम् ।
४६ **इषुबाहू स्त्रियां च –** चात्पुंसि ।
४७ **बणकाण्डौ नपुंसके च –** चात्पुंसि। त्रिविष्टपेत्यादिचतुःसुत्री
देवासुरेत्यस्यापवादः ।

४८ **नान्तः** – अयं पुंसि । राजा । तक्षा । न च चर्मवर्मादिष्वतिव्याप्तिः मन्ददव्यच्कोऽकर्तरीति नपुंसकप्रकरणे वक्ष्यमाणत्वात् ।

४९ **ऋतुपुरुषकपुलगुल्फमेघाभिधानानि** – ऋतुरध्वरः । पुरुषो नरः । कपोलो गण्ढः ।
गुल्फः प्रपदः । मेघो नीरदः ।

५० **अभ्रं नपुंसकम्** – पुर्वस्यापवादः ।

५१ **उकारान्तः** – अयं पुंसि स्यात् । प्रभुः । इक्षुः । हनुहर्हट्टविलासिन्यां नृत्यारम्भे गदे
स्त्रियाम् । द्वयोः कपोलावयव इति मेदिनी । करेणुरिभ्यां स्त्री नेभे उत्यमरः । एवंजातीयकविशेष्यवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः । उक्तं च । लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधित इति । एवमन्यत्रापि ।

५२ **धेनु–रज्जुहूकुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम् ।**

५३ **समासे रज्जुः पुंसि च** – कर्कटरज्वा । कर्कटरज्जुना ।

५४ **श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतामूनि नपुंसके ।**

५५ **वसु चार्थवाचि** – अर्थवाचीति किम्–वसुर्मयूखाग्निधनाधिपेषु ।

५६ **मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च** – चात्पुंसि । अयं मद्गु : ।
इदं मद्गु ।

५७ **रुत्वन्तः** – मेरुः । सेतुः

५८ **दारुकशेरुजतुवस्तुमस्तूनि नपुंसके** – रुत्वन्त इति पुंस्त्वस्यापवादः । इदं दारु।

५९ **सक्तुर्नपंसके च** –चात्पुंसि । सक्तु ।

६० **प्रग्ररश्मेरका–रान्तः** – रश्मिर्दिवसाभिधानमिति वक्ष्यति । ततः प्राक् एतस्मादकारान्त
इत्यधिक्रियते ।

६१ **कोपधः** – कोपधोऽकारान्तः पुंसि स्यात् । स्तबकः ।

६२ **चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके** – पुर्वसूत्रापवादः।

६३ **कण्टकानीक सरमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कव–**

र्चस्कपिनाकभाण्डकपिण्डककटकशण्कपिटकतालकफलकपुलाकानि नपुंसके च – चात्पुंसि । अयं कण्टकः । इदं कण्टकमित्यादि ।

६४ **टोपधः** – टोपधोऽकारान्तः पुंसि स्यात् घटः । पटः ।

६५ **किरीटमुकुटललाटवटविटश्रृङ्गाटकराटलोष्टानि नपुंसके** – किरीटमित्यादि ।

६६ **कुटकूटकपट–कवाटकर्पटनटनिकटकीटकटानि नपुंसके च** । चात्पुंसि । कुटः कुटमित्यादि ।

६७ **णोपधः** – णोपधोऽकारान्तः पुंसि स्यात् । गुणाः । गणाः। पाषाणाः ।

६८ **ऋणलवणपर्णतोरणरणोष्णनि नपुंसके** – पुर्वसूत्रापवादः ।

६९ **कार्षापणस्वर्णसुवर्णव्रणचरणवृषणचूर्णतृणानि नपुंसके च** – चात्पुंसि ।

७० **थोपधः** – रथः ।

७१ **काष्ठपृष्ठसिक्थोक्थनि नपुंसके** – इदं काष्ठमित्यादि ।

७२ **काष्ठादिगर्था स्त्रियाम्** – इमाः काष्ठाः ।

७३ **तीर्थप्रोथयुथगाथानि नपुंसके च** – चात्पुंसि । अयं तीर्थ । इदं तीर्थम् ।

७४ **नोपधः** – अदन्तः पुंसि । इनः । फेनः ।

७५**जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिन्हानि नपुंसके** – पुर्वस्यापवादः ।

७६**मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसंभावनविमानानि नपुंसके च** – चात्पुंसि । अयं मानः ।

७७ **अदन्तः पुंसि** – यूपः । दीपः ।

७८ **पापरुपोडुपतल्पशिल्पपुष्पसमीपान्तरीपाणि नपुंसके** – इदं पापमित्यादि ।

७९ **शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च** – अयं शूर्पः । इंद शूर्पमित्यादि ।

८० **भोपधः** – स्तम्भः ।

८१ **तलभं नपुंसकम्** – पुर्वस्यापवादः ।

८२ **जृम्भं नपुंसके च** – जृम्भम् । जृम्भः

८३ **मोपधः –** सोमः । भीमः ।

८४ **रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके** । इदं रुक्ममित्यादि ।

८५ **संग्रमदाडिमकुसुमाश्रमक्षौमहोमोद्दामनि नपुंसके च** – चात्पुंसि । अयं

संग्रामः । इदं संग्रामम् ।

८६ **योपधः –** समयः । हयः ।

८७ **किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके** – स्पष्टम् ।

८८ **गोमयकषायमलयान्वया**–व्ययनि नपुंसके च – गोमयः । गोमयम् ।

८९ **रोपधः –** क्षुरः । अङ्कुरः ।

९० **द्वाराग्रस्फारतक्रवक्रप्रक्षिपक्षुद्रनीरतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभी–रगभीरक्रूरविचित्रकेयूरकेदारोदराजस्त्रशरीरकन्दरमन्दारपञ्जराजरज–ठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्ब–रशिशिरतन्त्रयन्त्रनक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्वनेत्रगोत्राङ्गु–लित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके –** इदं द्वारमित्यादि ।

९१ **शुक्रमदेवतायान् –** इदं शुक्रं रेतः ।

९२ **चक्रवज्रान्धकारसारावारपारक्षीरतोमरश्रुङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च** – चात्पुंसि । चक्रः । चक्रमित्यादि ।

९३ **षोपधः –** वृषः । वृक्षः ।

९४ **शिरीषर्जीषाम्बरीषपीयूषकिल्बिषकल्माषाणि नपुंसके** ।

९५ **यूषकरीषमिषविषवर्षाणि नपुंसके च** – चात्पुंसि । अयं यूषः । इदं यूषमित्यादि ।

९६ **सोपधः –** वत्सः। वायसः । महानसः ।

९७ **पनसबिसबुससाहसानि नपुंसके** ।

९८ **चमसांसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च**–इदं चमसम् । अयं चमस इत्यादि ।

९९ **कंसं चाप्राणिनि** – कंसोऽस्त्री पानभाजनम् । प्रणिनि तु कंसो नाम कश्चिद्राजा।

१०० **रश्मिदिवसाभिधानानि** – एतानि पुंसि स्युः। रश्मिर्मयूखः दिवसो घस्रः।

१०१ **दीधितिः स्त्रियाम्** – पुर्वस्यापवादः

१०२ **दिनाहनी नपुंसके** – अयमप्यपवादः

१०३ **मानाभिधानि** – तानि पुंसि स्युः । कुडवः प्रस्थः ।

१०४ **द्रोणाढकौ नपुंसके च** – इदं द्रोणम् । अयं द्रोणः ।

१०५ **खारी–मानिके स्त्रियाम्** – इयं खारी । इयं मानिका ।

१०६ **दाराक्षतलाजासूनां बहुत्वं च** – इमे दाराः ।

१०७ **नाडचपजनोपपदानि व्रणाङ्गपदानि** – यथासंख्यं नाड्याद्युपपदानि व्रणादीनि पुंसि

स्युः । अयं नाडीव्रणः । अपाङ्ग :। जनपदः । व्रणादीनमुभयालिङ्गत्वेऽपि क्लीबत्वानुवृत्यर्थ सूत्रम् ।

१०८ **मरुद्गरुत्तरदृत्विजाः**– अयं मरुत् ।

१०९ **ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः** – एते पुंसि स्युः। अयमृषिः।

११० **ध्वजगजमुञ्जपुञ्जाः**– एते पुंसि।

१११ **हस्तकुन्तान्तव्रातवातदूतधूतसूतचूतमुहूर्ताः**– एते पुंसि । अमरस्तु मुहूर्तोऽस्त्रियामित्याह ।

११२ **षणडमणडकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः**– अयं षण्डः।

११३ **वंशांशपुरोडाशाः**– अयं वंशः पुरो दाश्यते पुरोडाशाः । कर्मणि घञ् ।

भवव्याख्यानयोः प्रकरणे 'पौरोडाशपुरोडाशात्ष्ठन्' (१४४६) इति विकारप्रकरणे

व्रिहेः पुरोडाशे(१५२८) इति च निपातनात्प्रकृतसूत्र एव निपातनाद्वा दस्य डत्वम् । पुरोडाषभुजामिष्टमिति माघः।

११४ **ह्रदकन्दकुन्दबुद्बुदशब्दाः** –अयं ह्रदः।

११५ **अर्घपथिमथ्यृभुक्तिस्तम्बनितम्बपूगाः**–अयमर्घः।

११६ **पल्लवपल्वलकफरेफ कटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धमृदङ्गसङ्गसमुद्गपुङ्खाः–**
अयं पल्लव इत्यादि।
११७ **सारथ्यतिथिकुक्षिबस्तिपाणयञ्जलयः–** एते पुंसि । अयं सारथिः ।

इति पुंल्लिङ्गाधिकारः ।

नपुंसकाधिकारः।

११८ **नपुंसकम् –** अधिकारोऽयम्।
११९ **भावे ल्युडन्तः –** हसनम् । भावे किम्–पचनोऽग्निः। इध्मप्रव्रश्चनः ।
१२० **निष्ठा च –** भावे या निष्टा तदन्तं क्लीबं स्यात् । हसितम् । गीतम् ।
१२१ **त्वष्यञौ तद्धितौ** – शुक्लत्वम् । शौक्ल्यम् । ष्यञः षित्वसामर्थ्यात्पक्षे स्त्रीत्वम् ।
चातुर्यम् । चातुरी । सामग्र्यम् । सामग्री । औचित्यम् । औचिती ।
१२२ **कर्मणि च ब्राह्मणादिगुणवचनेभ्यः –** ब्राह्मणस्य कर्म ब्राह्मण्यम् ।
१२३ **यद्यढग्यगञण्वुञ्छाश्चभावकर्मणि –** एतदन्तानि क्लीबानि । ‘ स्तेनाद्यन्नलोपश्च’
(१७९०) । स्तेयम् । ‘सख्युर्यः’ (१७९७) । सख्यम् । ‘कपिज्ञात्योर्ढक्’ (१७९२) ।
कापेयम् । ‘पत्यन्तपुरोहितादिभ्यो यक्’ (१७९६) । आधिपत्यम् । ‘ प्रणभृज्जातिवयो–
वचनोद्गात्रादिभ्योऽञ् ’ (१७९४) । औष्ट्रम् । ‘ हायनान्तयुवादिभ्योऽण् ’ (१७९५) ।
द्वैहायनम् । ‘ द्वन्द्वमनज्ञादिभ्यो वुञ् ’ (१७९८) । पितापुत्रकम् । होत्राभ्यश्छः
(१८००) अच्छावकीयम् । ‘अव्ययीभावः’ (६५९) ।अधिस्त्रि ।
१२४ **द्वन्द्वैकत्वम् –** पाणिपादम् ।
१२५ **अभाषायां हेमन्तशिशिरावहोरात्रे च –** स्पष्टम् ।

१२६ **अनञ्कर्मधारयस्तत्पुरुषः ।** अधिकारोऽयम् ।

१२७ **अनल्पे छाया । शरच्छायम् ।**

१२८ **राजाऽमनुष्यपूर्वा सभा –** इनसभमित्यदि ।

१२९ **सुरासेनाच्छायाशालानीशास्त्रियां च।**

१३० **परवत् –** अन्यस्तत्पुरुषः परवल्लिङ्ग स्यात् । रात्राह्नाहाः पुंसि ।

१३१ **अपथपुण्याहे नपुंसके ।**

१३२ **संख्यापुर्वा रात्रिः–** त्रिरात्रम् । संख्यापुर्वेति किम्–सर्वरत्रः ।

१३३ **द्विगु : स्त्रियां च** – व्यवस्थया । पञ्चमूली । त्रिभुवनम् ।

१३४ **इसुसन्तः** – हविः । धनुः ।

१३५ **अर्चिः स्त्रियां च** – इसन्तत्वेऽपि अर्चिः । स्त्रियां नपुंसके च स्यात् । इयमिदं वा अर्चिः ।

१३६ **छदिःस्त्रियामेव**–इयं छदि । छाद्यतेऽनेनेति
छादेश्चुरादिण्यन्तादर्चिशुचीत्यदिना इस् ।

इस्मन्नित्यादिना ह्रस्वः । पटलं छदिरित्यमरः । तत्र पटलसाहचर्यच्छदिषः क्लीबतां

वदन्तोऽमरव्याख्यातार उपेक्ष्या ।

१३७ **मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि** –

एतेषामभिधायकानि क्लीबे स्युः । मुखमाननम् । नयनं लोचनम् । लोहंख कालम् ।

वनं गहनम् । मांसमामिषम् । रुधिरं रक्तम् । कर्मुकं शरासनम् । विवरं बिलम्।

जलं वारि । हलं लाङ्गलम् । धनं द्रविणम् । अन्नमशनम् ।

अस्यापवादानाह त्रिसूत्र्या ।

१३८ **सीरार्थोदना : पुंसि ।**

१३९ **वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च**– वक्त्रो वक्त्रम् । नेत्रो नेत्रम् । अरण्योऽरण्यम् ।

गाण्डीवो गाण्डीवम् ।

१४० **अटवी स्त्रियाम्**

१४१ **लोपधः** – कुलम् । कूलम् । स्थलम् ।

१४२ **तुलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि**– अयं तुलः।

१४३ **शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवा–
लनिगलपलालबिडालखिलशूलाः**

पुंसि च – चात् क्लीबे । शीलं शील इत्यादि ।

१४४ **शतादिः संख्या** – शतम् । सहस्रम् । शतदिरिति किम्–एको द्वौ
बहवः। संख्येति

किम्–शतशृङ्गो नाम पर्वतः।

१४५ **शतायुतप्रयुताः पुंसि च** – अयं शतः । इदं शतमित्यदि ।

१४६ **लक्षा कोटिः स्त्रियाम्** – इयं कोटिः । वा लक्षा नियुतं च तदित्यमरात्
क्लीबेऽपि

लक्षम् ।

१४७ **शङ्कुः पुंसि ।**

१४८ **सहस्रः कचित्** – अयं सहस्रः । इदं सहस्रम् ।

१४९ **मन्द्व्यच्कोऽकर्तरि** – मन्प्रत्ययान्तो द्व्यच्कः क्लीबः स्थान्न तु कर्तरि
। वर्म। चर्म ।

द्व्यच्कः किम्–अणिमा । महिमा अकर्तरि । किम्–ददाति इति दामा ।

१५० **ब्रह्मन् पुंसि च** – अयं ब्रह्मा । इदं ब्रह्म ।

१५१ **नामरोमणी नपुंसके** – मद्व्यच्क इत्यस्यायं प्रपञ्चः ।

१५२ **असन्तो द्व्यच्कः** – यशः । मनः । तपः द्व्यच्कः किम्–चन्द्रमाः ।

१५३ **अप्सराः स्त्रियाम्** – एता अप्सरसः । प्रायेणायं बहुवचनान्तः ।

१५४ **त्रान्तः** – पत्रम् । छत्रम् ।

१५५ **यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव ।**

१५६ **भृत्रामित्रछात्रपुत्रमन्त्रमेढ्रोष्ट्राः पुंसि** – अयं भृत्रः । न मित्रममित्रः ।
तस्य

मित्राण्यमित्रास्ते इति माघः । स्यातामममित्रौ मित्रे चेति च । यत्तु द्विषोऽमित्रे
इति

सुत्रे हरदत्तेनोक्तम् । अमेर्द्विषदित्यौणदिक् इत्रच् । अमेरमित्रम्

मित्रस्यव्यथयेदित्यादौ मध्योदात्तस्तु चिन्त्यः । नञ् समासेऽप्येवम् । परवल्लिङ्गतापि

स्यादिति तु तत्र दोषान्तरमिति तत्प्रकृतसूत्रापर्यालोचनमूलकम् । स्वरदोषोद्भावनमपि

नञो जरमरमित्रमृता इति । षाष्ठसूत्रास्मरणमूलकमिति दिक् ।

१५७ **पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च ।**

१५८ **बलकुसुमशुल्बपत्तनरणाभिधानानि**– बलं विर्यम् ।

१५९ **पद्मकमलोत्पलानि पुंसि च** – पद्मादयःशब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्ग स्युः ।

अमरोऽप्याह वा पुंसि पद्मं नलिनमिति । एवं चार्धर्चादिसूत्रे तु जलजे पद्मं नपुंसकमेवेति वृत्तिग्रन्थो मतान्तरेण नेयः ।

१६० **आहवसंग्रमौ पुंसि।**

१६१ **आजिः स्त्रियामेव ।**

१६२ **फलजातिः**– फलजातिवची शब्दो नपुंसकं स्यात् । आमलकम् । आम्रम्।

१६३ **वृक्षजातिः स्त्रियामेव** – क्वचिदेवेदम् । हरीतकी

१६४ **वियज्जगत्सकृत्शकन्पृषत्शकृद्यकृदुदश्वितः** –एतेः क्लीबाः स्युः।

१६५ **नवनीतावतानानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजवृत्तपलितानि ।**

१६६ **श्राद्धकुलिशदैवपीठकुण्डाङ्गाङ्गदधिसक्थ्यक्ष्यास्यास्पदाकाश–कण्वबीजानि** – एतानि क्लीबे स्युः।

१६७ **दैवं पुंसि च**– दैवम् । दैवः ।

१६८ **धान्याज्यसस्यरुप्यपण्यवरर्थधृष्यष्पहव्यकव्यकाव्यसत्यापत्यमूल्य शिक्यकुड्यमद्यहर्म्यतुर्यसैन्यानि** – इदं धान्यमित्यदि ।

१६९ **द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचरवशरवृन्दारकाणि ।**

१७० **अक्षमिन्द्रिये** – इन्द्रिये किम्–रथाङ्गदौ मा भूत् ।

इति नपुंसकाधिकारः ।

स्त्रीपुंसाधिकारः ।

१७१ **स्त्रीपुंसयोः –** अधिकारोऽयम् ।
१७२ **गोमणियष्टिमुष्टिपाठलिवस्तिशाल्मलित्रुटिमसिमरीचयः** – इयं वा गौः ।
१७३ **मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः** – इयमयं वा मृत्यौः ।
१७४ **गुणवचनमुकारान्तं नपुंसकं च** – त्रिलिङ्गमित्यर्थः पटु । पटुः । पट्वी ।
१७५ **अपत्यार्थस्तद्धिते** – औपगवः । औपगवी । इति स्त्रीपुसाधिकारः।

पुंनपुंसकाधिकारः ।

१७६ **पुंनपुंसकयोः –** अधिकारोऽयम् ।
१७७ **घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः** – अयं घृतः । इदं घृतम् ।
१७८ **श्रृङ्गार्घनिदाघोद्यमशल्यद्दढाः** – अयं श्रृङ्गः । इदं श्रृङ्गम् ।
१७९ **व्रजकुञ्जकुथकूर्चप्रस्थदर्पाभार्धर्चदर्भपुच्छाः** –अयं व्रजः । इदं व्रजम् ।
१८० **कबन्धौषधायुधान्ताः** – स्पष्टम् ।
१८१ **दण्डमण्डखण्डशमसैन्धवपार्श्वाकशकुशकाशाङ्कुशकुलिशाः** – एते

पुंनपुंसकयोः स्यु । कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले इति विश्वः ।
शलाकावाची तु स्त्रियाम् । तथा च जानपद (२००) इति सूत्रेणायोविकारे ङीषि
कुशी । दारुणि तु टाप् । कुशा वानस्पत्याः स्थ ता मा पातेति श्रुतिः । अतः
कृकमि–(१६०) इति सूत्रे कुशाकर्णीष्विति प्रयोगश्च । व्याससूत्रे च । हानौ तूपायनशब्दे
शेषत्वात्कुशाच्छन्द इति । तत्र शरीरकभाष्येप्येवम् । एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे
स्थिते आच्छन्द इत्याङ्प्रश्लेषादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं
बहुश्रुतैः ।

१८२ **गृहमेहदेहपट्टपटहाष्टदाम्बुदककुदाश्च ।**

इति पुंनपुंसाकाधिकारः ।

१८३ **अविशिष्टलिङ्गम् ।**

१८४ **अव्ययं कतियुष्वदः ।**

१८५ **ष्णान्ता संख्या ।** शिष्टा परवत् । एकः पुरुषः । एका स्त्री । एकं कुलम् ।

१८६ **गुणावचनं च ।** शुक्रः पटः । शुक्ला पटी । शुक्लं वस्त्रम् ।

१८७ **कृत्याश्च ।**

१८८ **करणाधिकरणयोर्ल्युट् च ।**

१८९ **सर्वादीनि सर्वनामानि** – स्पष्टार्थेयं त्रिसूची ।

इति लिङ्गनुशासनं समाप्तम् ।

इति श्रीभट्टोजिदीक्तितविरचिता वैयाकरणा–

सिद्धान्तकौमुदी संपूर्णा ॥

श्रीः । मूले **अधिकारसूत्रे एते इति** । उभयोरधिकारसूत्रत्वेऽपि ‘ लिङ्ग ’ मित्याशास्त्रसमाप्तेः, द्वितीयस्तु ‘ताराधारा’ इति यावदिति विवेकः । अत्रापि लिङ्गं शास्त्रीयं प्रागुक्तमेव विवक्षितम् । तच्चार्थनिष्ठं तच्छब्दप्रतिपाद्यम् । तत्रायं विशेषः । शब्दशक्तिस्वभावेन कस्यचित्सर्वलिङ्गप्रतिपादकता, कस्यचिदेकलिङ्गप्रतिपादकता, कस्यचिद्विलिङ्गयुक्तार्थप्रतिपादकता चेति । यद्यपि शब्दानामर्थानां चानन्त्यात्प्रातिस्विकरुपेणा तेषां ज्ञानं योगिनां युक्तयुञ्जानत्वेन व्यवहारयोग्यानामेव संभवति न त्वस्मदादिनामज्ञानाम् , तथाप्यस्मदाद्युद्देशेन शास्त्रप्रवृत्तेर्यथा लघुनोपायेनास्मदादीनां ज्ञानं संभवेत्तथाह **ऋकारान्ता इत्यादिना** । ‘स्त्री’ ति पदमेषु सूत्रेषु संबध्यते । तच्च भावप्रधाननिर्देशेन स्त्रीत्वपरम्। तस्य लिङ्गपदेन बहुव्रीहिसमासे ‘ स्त्रीलिङ्गा’ इति सामानाधिकरण्येन व्यवहारः । मात्रादिशब्दानां विशेषत उपादानात्पञ्चेति लब्धम् । अवधारणस्य तु यथा लाभस्तं प्रकारमाह **स्वस्रादिपञ्चकस्यैवेति । ङीप्निषेधेनेति**। ‘न षट्स्वस्रादिभ्यः’ इति सूत्रेण

ङीपो निषेधेन **कर्त्रीत्यादेरिति** । अनेन कर्तृपदेन यौगिकाः शब्दा ऋकारन्ताः परिग्राह्याः । रुढस्य क्रोष्ट्रप्रभृतिशब्दस्यादिना परिग्रहः । न च सप्तैवेति वक्तव्ये पञ्चैवेति नियमानुपपत्तिरिति वाच्यम्, आदेशत्वानाक्रान्ताः पञ्चैवेत्यर्थात्। यद्यपि भाष्यसंमते 'तृज्वत्क्रोष्टुः' इत्यादित्रिसूत्र्याः प्रयोगनियमार्थत्वपक्षे स्त्रियां प्रवर्तमानस्य क्रोष्ट्रशब्दस्यादेशत्वानाक्रान्तत्वम् , तथापि परिनिष्ठिते शब्देऽयमीकारान्त एव प्रयुज्यत इति भावः । 'उणादयो बहुलम्' इति संगृहीतसाधुत्वकानां व्युत्पन्नत्वं शास्त्रान्तरे प्रसिद्धमिति तदभिप्रायेणाह **अन्यू इत्यादि** । अवनिः । 'अर्तिसृधृधम्यम्यक्षयवितृभ्योऽनिः' इत्यनिः । **चमूरिति** । 'कृषिचमितनिधनिसर्जिभ्य ऊः' इत्यूः। द्यूः। अत्र वकारस्य 'च्छवोः–' इत्यूठ् । **अशनिभर** । पूर्वसूत्रापवादोऽयम्। **मिन्यन्तः**। भूमिः । 'नीयो मिः' इत्यतो मिरित्यनुवर्त्य विहितो 'भुवः कित्' इति निः। ग्लानिः । 'वहिश्रिश्रुयुदुग्लाहात्वरिभ्योनित्' इति निः । वह्न्यादिशब्दानां निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते आह **वह्निवृष्णि** । वृष्णिः । 'सृवृषिभ्यां कित्' इति निः । अग्निः । 'आङ्गेर्नलोपश्च' इति निः । **श्रोणियोन्यू** । श्रोणिः । योनिः । 'वहिश्रि–' इति निः। ऊर्मिः । 'अर्तेरुच्च ' इति निः । **ईकारान्तश्च** । अत्र ईकारः प्रत्यय एव पूर्वोत्तरसाहचर्यात्। **लक्ष्मीरिति** । अत्र 'लक्ष्मेर्मुट् च' इति सूत्रे 'अवितृस्तृन्त्रिभ्य ईः' इत्यत ईरित्यस्यानुवृत्त्या–तेनेकारः प्रत्ययः । एवमव्यादिधातुभ्य ईकारप्रत्ययेऽपि स्त्रीत्वम् । तद्यथा अवीर्नारी रजस्वला, तरीर्नौस्तरी धूमः , तन्त्रीर्वीणादेर्गुणाः। नच यापोः किद्वे च इति सूत्रविहितेकारान्तस्यापि स्त्रीत्वापत्तिरिति वाच्यम् । पुंस्त्वाधिकारोक्तेन 'योपधः' 'पोपधः' इत्याभ्यां परत्वाद्बाधात् । यूप इत्यादौ प्रथमस्य, समय इत्यादौ द्वितीयस्य चारितार्थ्यात् । एवं च पपीययीशब्दयोः पुंस्त्वेऽपि न क्षतिः। **ऊङाबन्तश्च**। 'ऊङूतः' ईत्यूङ् । आब्ग्रहणेन टाप्डापचापां ग्रहणाम् । **य्वन्तमेकाक्षरम्**। ईकारोऽत्र प्रत्ययः । ऊकारसाहचर्यात्। **विंशत्यादिरानवतेरिति**। विंशत्यादयः 'पङ्क्तिविंशति–' इति सूत्रनिर्दिष्टाः । **दुन्दुभिरक्षेषु** । अक्षेषु बोधनीयेषु यः प्रयुज्यत इत्यर्थः । **इयं नाभिरक्षत्रिये –** क्षत्रियभिने यो नाभिशब्दः प्रयुज्यते स स्त्रियां स्यात् । **नाभिरिति** । पुरुषावयवे इदम् । **उभावप्यन्यत्र पुंसि**। इदं स्पष्टार्थम्, पूर्वसूत्रयोः अक्षेष्वक्षत्रिये इत्यभिधानेन सिद्धेः । **कथं तर्हीति** । अत्र यत्कोमलैरिति तदनुपपन्नम् । स्त्रीलिङ्गनाभिशब्दाविशेषणत्वात् । **सामान्य इति** । लिङ्गविशेषाविवक्षया नपुंसकं कोमलैरिति प्रसाध्य तस्य नाभिशब्दार्थविशेषणत्वं स्वीकार्यम् । विशेष्यप्रतिपादकस्य यथा पुंस्त्वं तथास्यापि भविष्यतीत्याशयेन

समाधानान्तरमाह **वस्तुतस्त्विति** । 'चक्रमध्यक्षत्रिययोः' इत्यत्र चक्रमध्यं च क्षत्रियश्चेति द्वन्द्वः । अत एव प्राण्यङ्गके द्वयोः इति संगच्छते । **तलन्तः** । 'तस्य भावस्त्वतलौ' इति सूत्रविहिततल्प्रत्ययान्तः स्त्रियां स्यात्। **भूमिविद्युदिति** । अत्राभिधानशब्दो भूम्यादिशब्दे शक्यतावच्छेदकधर्मावच्छिन्नशक्तपरत्वेन प्रमेयशब्दव्यावृत्तिः । एवमन्यत्रापि बोध्यम् । **यादो नपुंसकम्** । पुर्वस्यापवादः । **स्थूणोर्णे नपुंसके च** । चकारेण स्त्रियामित्यस्यानुकर्षणार्थमस्यात्र लेखः । **प्रवृडिति** । स्त्रीशब्दस्य पूर्वत्र चानुकृष्टत्वेऽपि 'स्वरितेनाधिकारः' इत्यस्याधिकः कार इति व्याख्यानस्यापि प्रसिद्धत्वादत्र संबन्धः। **दर्विविदि** । दर्विशब्दो 'वृट्भ्यां विन्' इति विन्नन्तः, 'सर्वतोऽक्तिन्नर्थादित्येके' इति विकल्पेन ङीप् दर्वी इति । **तिथिनाडि । एते प्राग्वदिति** । स्त्रियां स्युरित्यर्थः। **पुंस्येवेति** । देवासुरात्मेत्यनेन पुंस्त्वबोधकेन परत्वाद्बाधादिति भावः । **भाष्यप्रयोगादिति**। तेन भाष्येणा 'अप्सुमनः' इति सुत्रनिर्दिष्टानां बहुत्वं प्रयिकमिति विकल्पेनान्यत्र बहुत्वाभावेऽपि न क्षतिः । **क्वचिद्व्यहाभिचारमिति** । तेन् तिथिशब्दस्य पुर्वत्र यथां पुंस्त्वं प्रदर्शितं तथान्योषामन्यलिङ्गत्वेऽपि साधुत्वमिति सूचयति ॥ इति लिङ्गानुशासने स्त्र्यधिकारः॥

भावार्थ एवेति । भावे यो घञ् तदन्तस्य पुंस्त्वमित्युक्तम् । एतल्लाभप्रकारमाह **नपुंसकेत्यादि** । **भयलिङ्गेत्यादि** । पुर्वस्यापवादोऽयम् । **क्यन्तो घुः** । किप्रत्ययोऽन्तः परो यस्मात्तादृशो घुसंज्ञको धातुस्तद्घटितः पुमानित्यर्थः। **देवासुरा** । अत्र पङ्कशब्दान्तद्वन्दं कृत्वा तस्य षष्ठीसमासोऽभिधानशब्देन कर्तव्यः, अभिधानशब्दः करणाल्युडन्तो वाचकशब्दपरः, तेन देवादिशब्दवाच्यतावच्छेदकेत्यादिपूर्ववद्बोध्यम् । शब्दस्वरुपापेक्षया च नपुंसकत्वम्। **त्रिविष्टप। स्वर्गाभिधानत्वात्वपुंस्त्वे प्राप्तेऽयमारम्भ इति** । अत एवाहामरसिंहः 'क्लीबे त्रिविष्टपम्' इति। **द्यौः स्त्रियाम्** । अस्य स्वर्गाभिधानत्वात्पुंस्त्वस्य पूर्वेण प्राप्तेरयमारम्भः । **इषुबाहू** । शरभुजपर्यायाविमौ । **बाणाकाण्डौ** । शरभिधानोऽयम्। **नान्त इति** । नान्तप्रत्ययान्त इत्यर्थः । **अभ्रं नपुंसकमिति** । मेघाभिधानविषये पूर्वस्यापवाद इत्यर्थः । **लिङ्गशेषविधिरिति**। लिङ्गस्य शेषोऽवशेषस्तस्य विधिः व्यापी काण्डत्रयस्य विधिव्यापी काण्डत्रयस्य व्यापको यदि विशेषशास्त्रेण बाधितो न स्यादित्यर्थः । **नपुंसके चेति** । चात्पुंसि । **वसु चार्थवाचि** । अर्थवाची वसुशब्दो नपुंसके च दृष्टव्यः । **रुत्वन्तः** । उकारो नकारेत्संज्ञकः । मेरुः । सेतुरित्यत्र सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन् इति तुन् । सूर्यवाचकः

प्रथमः । **दारु–कशेरु**। जज्वादित्वदुप्रत्ययान्ता एते । कंसं चाप्राणिनि । कंसमिति शब्दस्य निर्देशात् 'नपुंसके च' इत्यस्य संबन्धः । अप्राणिनि वाच्ये कंसशब्द इत्यर्थः । **दिनाहनी** । दिवसाभिधानाविमौ। खारीमानिके । मानाभिधानत्वात्पुंस्त्वे प्राप्तेऽस्यारम्भः। **बहुत्वंचेति** । चकारः पुंस्त्वस्य समुच्चायकः। **नाड्यपजनोपपदानि व्रणाङ्गपदानि** । अत्रोपदशब्दः पुर्वपदपरो नतु 'तत्रोपपदम्–' इति तत्संज्ञकपरः । तस्य प्राप्त्यभावात् । **क्लीबत्वनिवृत्त्यर्थमिति**। नपुंसकाधिकारे ' मुखनयन' इत्यादिवक्ष्माणसूत्रेण विवराभिधानत्वेन क्लीबत्वं प्राप्तं तन्निवृत्त्यर्थमित्यर्थः॥ **अमरस्त्विति**। एवं च तन्मतेऽर्धर्चादिष्वयं दृष्टव्यः।

इति लिङ्गानुशासने पुँल्लिङ्गधिकारः।

भावे ल्युडन्तः । इदं च सूत्रं यद्यपि 'नपुंसके भावे क्तः' 'ल्युट् च' इत्यनेन गतार्थं तथापि स्पष्टार्थमुपात्तम् । एवमन्तग्रहणं चेति बोध्यम् । **इध्मप्रव्रश्चन इति** । अत्र करणे ल्युट् । **निष्ठा च** । अत्र निष्ठपदं क्तस्य बोधकम् । इदमपि सूत्रं 'नपुंसके भावे क्तः' इत्यनेन गतार्थम् । प्रत्ययग्रहणे तदन्तस्य ग्रहणम् । **त्वष्यञौ तद्धितौ** । भावे इत्यनुवर्तते। यद्यपि 'तस्य भावः –' इति सूत्रे भावशब्दः प्रकृतिजन्यबोधीयप्रकारताश्रयधर्मपरः । 'भावे ल्युडन्तः' इत्यत्र तु भावशब्दो भावनाबोधक इति भेदस्तथापीह भावशब्दः शब्दाधिकारेणान्यार्थको दृष्टव्यः । **कर्मणि च** । चाद्भावे। त्वष्यञावित्याद्यनुवर्तते । **स्तेनाद्यन्नलोपश्चेति**। यद्यपीदं सूत्रं प्राग्व्याख्यातमेव तथापीतः प्रभृति कथितनपुंसकत्वस्पष्टप्रतिपत्त्यर्थमिहोपादानमिति बोध्यम् । **द्वन्द्वैकत्वमिति** । 'द्वन्द्वश्च प्राणितूर्य–' इत्यादिना येषां द्वन्द्वानामेकवद्भावो भवति ते द्वन्द्वा नपुंसकत्वाभिधायका बोध्या इत्यर्थः । **अभाषायामिति** । इदमपि सूत्रं ' हेमन्तशिशिरावहोरात्रे च छन्दसि' इति सूत्रे छन्दसीत्युपादानेन गतार्थम् । हेमन्तशिशिरावित्यत्र तु निर्देशादेव पुंस्त्वप्रतिपादकता बोध्या । **स्त्रियां चेति** । चेन नपुंसकमित्यनुकर्षः । 'विभाषा सेना –' इति विभाषापदोपादानेनेदमपि गतार्थमित्यर्थः । **परवदिति** । 'परवल्लिङ्गः –' इति सूत्रोपात्तपरवदिति सूत्रस्य स्मारकमिह परवदिति, नत्विदमपूर्वम् । तत्पुरुष इति द्वन्द्वस्याप्युपलक्षणम् । **संख्यापूर्वा रात्रि** : । 'संख्यापूर्वं रात्रं क्लीबम्' इत्यस्यानुवादः। **द्विगुः स्त्रियां चेति** । चान्नपुंसकमिति संबध्यते । इदमपि 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' 'पात्राद्यन्तस्य न' इत्यनेन गतार्थम्।

अत एवाह **व्यवस्थयेति ।** **इसुसन्तः** । 'अर्चिशुचि हुसृपिछर्दिभ्य इसिः' 'जनेरुसि :' एतयोरुपात्तावेतौ। **छदिः स्त्रियामेवेति** । यद्यपि छदिरित्यस्येसन्तत्वेन नपुंसकत्वे प्राप्ते विशेषोपादानेन स्त्रियामित्यनेनैव नित्यस्त्रीत्वलाभे सिद्धे एवकारो व्यर्थः, तथापि 'पटलं छदिः' इत्यमरग्रन्थदर्शनेन साहचर्यान्नपुंसकत्वमपीति भ्रान्तिः स्यात्तन्निवारणायैवकारः । अत एव वक्ष्यति **अमरव्याख्यातार इति** । **अस्येति** ' मुखनयन–' इति सूत्रस्य । **सीराथौदनाः** । सीरशब्दो हलाभिधानः । अर्थशब्दस्तु घनशब्दस्य पर्यायः । ओदनशब्दोऽन्नवाची। भिस्साभिस्सटाशब्दौ तु दग्धान्नपराविति तयोः स्त्रीत्वेऽपि न क्षतिरिति । **अटवी स्त्रियाम्**। अयं वनाभिधानः । **संख्येति** । संख्यावाचीत्यर्थः । **शतायुत** । अयं शतशब्दोऽनन्तवाची । ' शतादिः–' इति पूर्वसूत्रापवादोऽयम् । **लक्षाकोटी** । एतयोरपि संख्यावाचकत्वान्नपुंसकत्वे प्राप्ते इदम् । **क्लीबेऽपीति** । एवं चायमर्धर्चादिषु द्रष्टव्यः । **शङ्कुः पुंसि** । अस्य शङ्कुशब्दस्य संख्याविशेषवाचकत्वात् शतादिः संख्या इति नपुंसकत्वे प्राप्तेऽस्यारम्भः । **सहस्रः क्वचिदिति** । क्वचिदिति अर्थविशेष इत्यर्थः । 'सहस्त्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इत्यत्रानन्तवांची। नचात्र सहस्त्रशब्दस्यानन्तपरत्वे संख्यापरत्वाभावेन सहस्त्रपादित्यत्र 'संख्यासुपूर्वस्य' इति पादशब्दान्त्यलोपो न स्यादिति वाच्यम् । नियतविषयपरिच्छेदकत्वरुपसंख्यात्वाभावेऽपि यथाकथंचित्संख्यायाः प्रतीतिरिति लोपः। वस्तुतश्छान्दसो लोप इति तूचितम् । **मन्व्द्यच्कः** । अत्र मन्प्रत्ययः श्रूयमाणनकारान्तः 'सर्वधातुभ्यो मनिन्' इति विहितः । **चर्म वर्मेति** । चरादिधातोर्मनिन्प्रत्ययः । बाहुलकादिडभावः अणिमादौ त्विट् । दामेत्यत्रापि 'सर्वधातुभ्यो मनिन्' इत्यनेनैव मनिन् परं त्वयं विशेषः । उणादिप्रत्ययान्तानां संज्ञाशब्दपरत्वेन यादृशी व्युत्पत्तिर्यत्रोचिता सा कल्पनीयेति कर्तर्यपि प्रत्ययः संभवतीति। **ब्रह्मेति** । 'बृंहेर्नोच्च' इति मनिन्प्रत्ययः । **असन्तो हव्यच्कः** । 'सर्वधातुभ्योऽसुन्' इति विहितोऽसुन् । तस्यासुनो येष्वनुवृत्तिस्यदन्ता अपि बोध्याः । 'चन्देर्मो डित्' इति विहितासुन्प्रत्ययान्तश्चन्द्रमस् शब्दोऽप्यसुन्नन्तः । कृद्ग्रहणो गतिकारकपूर्वस्यापि ग्रहणात्। एवमप्सरःशब्दोऽपि । **त्रान्तः** । त्रप्रत्ययान्तो नपुंसकः स्यात् । 'सर्वधानुभ्यष्ट्रन्' इति अन्प्रत्ययो नकारानुबन्धक इति । **यात्रामात्रा** । 'हुयाम' इति विहितस्त्रन्प्रत्ययोऽपिग्रहणेन गृह्मत इति नपुंसकत्वे प्राप्तेऽस्यारम्भः । एवकारो न्यायसिद्धबाध्यबाधकभावानुवादकः। **भृत्रमित्र** । पूर्वस्यापवादः । **यत्त्विति** ।

दोषान्तरमित्यन्ता तदुक्तिः । मध्योदात्तः मकारेकारस्य प्रत्ययाद्युदात्तत्वेन मध्योदात्त इति तद्भावः । **चिन्त्य इति** । चित्वस्य सत्त्वात् । नन्वमित्रशब्दो नेत्रन्तः किन्तु 'अमिचिमि –' इति धातुविहितक्त्रान्तमित्रशब्देन नञः समासे सति सिद्ध इत्याह **नञ्समासेऽप्येवमिति** । अन्तोदात्त इत्यर्थः । **परवल्लिङ्गातेति** । एवं सति नपुंसकत्वं स्यात्। हरदत्तोक्तं दूषयति **तत्प्रकृतेत्यादिना** । **नञो जरमरेति** । यदि तु न मित्रम् अमित्र इति नञ्समासस्तदा न 'नञो जरमरमित्र–' इत्यस्य प्राप्तिस्तस्य बहुव्रीहिसमासे प्रवृत्तेरिति बोध्यम् । **कुसुमाभिधायित्वेति**। वस्तुतः कुसुमाभिधायित्वेऽपीत्यर्थः । यदि तु कुसुमविशेषाभिधायकोऽयं न तु कुसुमशब्दशक्यतावच्छेदकावच्छिन्नशक्त इति विभाव्यते तदा त्वपूर्वमेवोभयलिङ्गत्वाभिधानमिति । मतान्तरेण जलजशब्दस्य जलजातकुसुमान्तराभिधायकत्वमित्यभिप्रायकमतान्तरेणेत्यर्थः । **आहवसंग्रामौ पुंसि** ॥ एतयोर्युद्धभिधायकत्वान्नपुंसकत्वे प्राप्ते । एवमाजिशब्दोऽपि । **फलजातिरिति**। फलोपादानाद् वृक्षपरस्यामलकीशब्दस्य स्त्रीत्वेऽपि न क्षतिः । **हरीतकीति** । हरीतक्याः फलानि हरीतक्यः । ' हरीतक्यादिषु व्यक्तिः इति स्त्रीत्वाभिधानात् । **रथाङ्गादाविति**। आदिना देवनाक्षपरिग्रहः॥

इति लिङ्गनुशासने नपुंसकाधिकारः ।

स्त्रीपुंसयोः। अधिकारोऽयम् । **नपुंसकं चेति** । चात्स्त्रीपुंसयोः ।

इति लिङ्गनुशासने स्त्रीपुंसाधिकारः।

शलाकावाचीति । सा च शलाका काष्ठादिनिर्मिता । तत्र मानमाह **तथा चेति** । इति पुंनपुंसकाधिकारः।

अविशिष्टलिङ्गम् । तत्तल्लिङ्गवाचकताप्रयुक्तकार्यविशेषशून्यम् । **शिष्टा इति** । पूर्वोक्तशब्दान्यतमत्वावच्छिन्नप्रतियोगिताकभेदवन्तः । **परवदिति** । विशेष्यवदित्यर्थः। **गुणावचनं च** । परवदित्यनुवर्तते । **कृत्याश्च** । कृत्यप्रत्ययान्ताः परवद्बोध्याः **सर्वादीनि सर्वनामानि** । सर्वनामसंज्ञकानि सर्वादीनि परवद्बोध्यानि ।

स्पष्टार्थेति । लोकव्युत्पत्त्यैव तत्तल्लिङ्गभिधानसिद्धत्वात्। अत एवं ‘ लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य’ इति भगवता भाष्यकृतोक्तम् । तेन यौगिकेषु शब्देषु लोकव्युत्पत्तिरेव लिङ्गभिधाने प्रमाणामिति सिद्वम् ।

इति लिङ्गनुशासनविवरणाम् ।

इति श्रीमदनन्तकल्याणसदूगुणनिधानाखिलपण्डितसार्वभौमभूमण्डल
संचारिविमलतरानवद्यसद्यशःपार्वणपीयूषभान्वगस्त्यकुलवंशा–
वनंसश्रीमद्भवदेवमिश्रात्मज**भैरवभिश्र** प्रणीतं लिङ्गानु–
शासनव्याख्यानं संपूर्णम्।

संपूर्णा चेयं सिद्धान्दकौमुदी ।

॥ श्रिः ॥

सिद्धान्तकौमुदीपरिशिष्टानि ।

अथ पाणिनीयशिक्षा १

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा ।
शात्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः॥ १॥
प्रसिद्धपि शब्दार्थमविज्ञातमबुद्धिभिः।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥ २॥
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ ३॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ ४॥
अनुस्वारो विसर्गश्चःकःपौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेयो ॠकारः प्लुत एव च ॥ ५॥ १॥
आत्मा बुध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ६॥
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।
प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् ॥ ७ ॥
कण्टे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ ८॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥ ९॥
स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥ १०॥ २॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥ ११॥

उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ १२॥
अष्टौ स्थानानि वर्णानामुरः कण्टः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ १३॥
ओभावश्च विवृत्तिश्च शषसा रेफ एव च ।
जुह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १४॥
यद्योभावप्रसंधानमुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ १५॥ ३॥
हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् ।
औरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥ १६॥
कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।
स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥ १७॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्योः वः स्मृतो बुधै : ।
एऐ तु कण्ठ्यतालव्यो ओऔ कण्ठोष्टजौ स्मृतौ ॥ १८॥
अर्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् ।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥ १९॥
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् ।
घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृता ॥ २०॥ ४॥
स्वराणामूष्मणां चैव विवृतं करणां स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ २१॥
अनुस्वारयमानां च नासिकास्थानमुच्यते ।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥ २२॥
अलाबुवीणानिर्घोषो दन्त्यमूल्यस्वराननु ।
अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥ २३॥
अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये ।
द्विराष्ठ्यौ तु विगृह्णीयाद्यत्रोकारवकारयोः ॥ २४ ॥
व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पिडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ २५॥ ५॥

यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते ।
एवं रङ्गा प्रयोक्तव्या : खे अराँ इव खेदया ॥ २६॥
रङ्गवर्णं प्रयुञ्जीरन्नो ग्रसेत्पूर्वमक्षरम् ।
दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् ॥ २७॥
हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि ।
नासिकायां तथार्धं च रङ्गस्यैवं द्विमात्रता ॥ २८॥
हृदयादुत्करे तिष्ठन्कांस्येन समनुस्वरन् ।
मार्दवं च द्विमात्रं च जघन्वाँ इति निदर्शनम् ॥ २९॥
मध्ये तु कम्पयेत्कम्पमुभौ पार्श्वौ समौ भवेत् ।
सरङ्गं कम्पयेत्कम्पं रथीवेति निदर्शनम् ॥ ३०॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१॥ ६॥
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ ३२॥
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३३॥
शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसि गरं तथा स्थानविवर्जितम् ॥ ३४॥
उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम्
॥ ३५॥
प्रातः पठेन्नित्यमुरः स्थितेन स्वरेणा शार्दूलरुतोपमेन ।
मध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन
॥ ३६ ॥
तारं तु विद्यात्सवनं तृतीयं शितोगरं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यमृतस्वराणां तुल्येन नादेन शिरःस्थितेन
॥ ३७॥ ७॥
अचोस्पृष्टा यणास्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥ ३८॥

ञमोनुनासिका नह्रौ नादिनो हझषः स्मृताः ।
ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः ॥ ३९॥
ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते ।
दाक्षीपुत्रः पाणीनिना येनेदं व्यापितं भुवि ॥ ४०॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ ४१॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्येव ब्रह्मलोके महीयते ॥ ४२॥ ८॥
उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा ।
उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव
॥ ४३॥
उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम् ।
निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥ ४४॥
अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् ।
मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या
॥ ४५॥
अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती ।
अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं
वीर्यं नीचस्वरितम् ॥ ४६॥
हविषां मध्योदात्तं स्वरिति स्वरितम् ।
बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम्
॥ ४७॥
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥ ४८॥ ९॥
चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः ।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥ ४९॥
कुतीर्थादागरं दग्धमपवर्णं च भक्षितम् ।
न तस्य पाठे माक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ ५०॥
सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम् ।

सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ५१॥

मन्त्रो हीनः स्वरतो वर्णातो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्
॥ ५२॥

अवक्षरं हनायुष्यं विस्वरं व्याधिपीडितम् ।
अक्षताऽशस्त्ररुपेणा वज्रं पतति मस्तके ॥ ५३॥
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ५४॥
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥ ५५॥ १०॥
शंकरः शांकरीं प्रादद्दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ ५६॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणां प्रोक्तं तस्मै पाणिनये नमः ॥ ५७॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ५८॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ ५९॥
त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा
द्विजः ।
स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते
दिवीति दिवीति ॥ ६० ॥ ११ ॥
अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथा
गीत्यचोस्पृष्टोदात्तं चाषस्तु शंकर एकादश ।

इति पाणिनीयशिक्षा समाप्ता ॥